# N-211512–C

## विषय : संस्कृतम् ( सामान्यम् )

समय : 3 घण्टे ] [ पूर्णांक : 75

*निर्देश* : (*i*) सर्वे प्रश्ना: समाधेया:।
(*ii*) सुन्दरं सुस्पष्टञ्च लिखत।

---

प्रश्न–1 निम्नरेखाङ्कितशब्दयो: सन्धिविच्छेदं कृत्वा तयो: नाम लिखत— [1×2=2]

( *क*) 'शिशु:' इति अजन्त: शब्दो वर्तते।

( *ख*) यजमान: पुरोहिताय गान्ददाति।

प्रश्न–2 निम्नरेखाङ्कितशब्दयो: प्रकृतिं प्रत्ययं च पृथक् कुरुत— [1×2=2]

( *क*) कवे: कवित्वं प्रशंसनीयम् अस्ति।

( *ख*) गायिका मधुरं गायति।

प्रश्न–3 अध: प्रदत्ते संख्ये संस्कृतभापया लिखत— [1×2=2]

( *क*) 147

( *ख*) 126

**प्रश्न-4** अधोलिखित पदयो: उपसर्गं पृथक् कुरुत— [1×2=2]

(क) वितरति

(ख) उत्तिष्ठति

**प्रश्न-5** अधोलिखित वाक्येषु वाच्यमवबुध्य नाम लिखत— [1×3=3]

(क) भक्तेन गीता पठ्यते।

(ख) बालकेनक्रीड्यते।

(ग) स: युष्मान् पश्यति।

**प्रश्न-5** अधोलिखित वाक्येषु वाच्यमवबुध्य नाम लिखत— [1×3=3]

(क) भक्तेन गीता पठ्यते।

(ख) बालकेनक्रीड्यते।

(ग) स: युष्मान् पश्यति।

**प्रश्न-6** कोष्ठकाद् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत— [1×3=3]

(क) अहं विद्यालये संस्कृतम् ——— पठामि। (अपि / गणितं / मधुरं)

(ख) बालका: ——— क्रीड़ाक्षेत्रे क्रीडन्ति। (क्रीड़ां / इदानीं / कन्दुकेन)

(ग) त्वं गृहात् ——— आगमिष्यसि। (कदा / यानेन / स्वेच्छया)

**प्रश्न-7** अधोलिखित विग्रहवाक्यानां सामासिकं पदं लिखित्वा तेषां नामानि अपि लिखत— [1×3=3]

(क) हरिश्च हरश्च

(ख) चन्द्र: शेखरे यस्य स:

(ग) त्रयाणां लोकानां समाहार:

**प्रश्न-8** अधोलिखित गद्यांशस्य हिन्दीभाषया अनुवादं कुरुत— [3]

कश्चन् निर्धनो जन: भूरि परिश्रम्य किञ्चिद् वित्तम् उपार्जितवान्। स: स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दातुं सफलो जात:। तत्तनय: तत्रैव छात्रावासे निवसन् अध्ययने संलग्न: समभूत्। एकदा स: पिता, तनुजस्य रुग्णतामाकर्ण्य व्याकुलो जात:। पुत्रं द्रष्टुं च प्रस्थित:। परमर्थकार्श्येन पीड़ित: स: बसयानं विहाय पदातिरेव प्राचलत्।

**प्रश्न-9** अधोलिखित गद्यांशस्य हिन्दीभाषया अनुवादं कुरुत— [3]

प्रतिरविवारे पिता-पुत्रौ गान्धिनः दर्शनार्थं सेवाश्रमम् अगच्छताम्। तत्र बालः तुलेन्द्रः गान्धिनः भ्रमणसहायकश्चासीत्। अत्रैव तस्य बालमनसि सेवाभावनाबीजं स्फुटितम्। पित्रा सह बरबन्दाग्रामे अस्य शैशवं छात्रजीवनं च व्यतीतम्। तेन सर्वासु परीक्षासु प्रथमश्रेण्यामुत्तीर्य प्रतिभाप्रतिस्थापिता।

**प्रश्न-10** अधोलिखित श्लोकस्य हिन्दीभाषया अनुवादं कुरुत— [3]

दिनान्ते च पिबेत् दुग्धम्, निशान्ते च पिबेत् पयः।
भोजनान्ते पिबेत् तक्रम् किं वैद्यस्य प्रयोजनम्॥

**प्रश्न-11** अधोलिखित श्लोकस्य हिन्दीभाषया अनुवादं कुरुत— [3]

श्रुनेन श्रोत्रियो भवति तपसा विन्दते महत्।
धृत्या द्वितीयवान् भवति राजन् बुद्धिमान् वृद्धसेवया॥

---

**प्रश्न-12** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4]

(*i*) भारत्यै किं रोचते?

(*ii*) के रोगाणाम् अपहारकाः?

(*iii*) लाभानामुत्तमं किम् अस्ति?

(*iv*) मत्स्यपालनक्षेत्रे कः पुरस्कारः दीयते?

(*v*) आत्मानन्देन लिखितग्रन्थस्य नाम किम्?

(*vi*) मङ्गलयानं कुतः विमुक्तम्?

**प्रश्न-13** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत— [1×4=4]

(*i*) लोकः केन न प्रकाशते?

(*ii*) आत्मानन्दस्य जन्म कदा अभवत्?

(*iii*) मतिवैभवशालिनः दुष्कराणि कार्याणि कथं साधयन्ति?

(*iv*) राजा विलासां कस्मिन् पदे न्ययोजयत्?

(*v*) कः देशः स्वकीये प्रथमप्रयासे मङ्गलग्रहकक्षम् अलभत?

(*vi*) संसारे कानि कानि चक्रवत् परिवर्तन्ते?

प्रश्न-14 स्वपाठ्यपुस्तकात् चतस्रः सूक्तीः लिखत याः प्रश्नपत्रेऽस्मिन् नागताः स्युः। [1×4=4]

*अथवा*

अत्र अधः सूक्तिवाक्यद्वयं प्रदीयते। सूक्तिवाक्ये पठित्वा अवबुध्य च तयोः भावार्थं लिखत—

(*i*) यत्र जीवः, तत्र शिवः।

(*ii*) तपसा विन्दते महत्।

प्रश्न-15 (*अ*) भवतः नाम सुरेशः। भवान् शा. उच्च. माध्य. विद्यालय राजपुरे दशम्याः कक्षायाः छात्रः। कतिपयेभ्यः दिनेभ्यः भवान् अस्वस्थताम् अनुभवन् अस्ति, विद्यालयं च गन्तुम् असमर्थोऽस्ति। अतः अवकाशाय प्राचार्यं प्रति संस्कृतभाषया प्रार्थनापत्रं लिखतु। [1+2+1=4]

*अथवा*

अध्ययनशुल्कमुक्तये प्राचार्यं प्रति प्रार्थनापत्रम् अधः प्रदत्तम् अस्ति। लिखितेऽस्मिन् पत्रे रिक्तस्थानानि सन्ति। तानि कोष्ठकप्रदत्तपदानां सहयोगेन पूरयत। [½×8=4]

(अध्ययनशुल्कं, न्यूनः, मम, एका, निवेदयामि, सदस्याः, निर्वाहः, महोदयः)

सेवायाम्

प्राचार्यः ---(*i*)---

शास. उच्च. मा. विद्यालयः

राजपुरम् छत्तीसगढ़म्

विषयः अध्ययनशुल्कमुक्त्यर्थं प्रार्थनापत्रम्।

महोदय,

सविनयं निवेदनम् अस्ति यत् ---(*ii*)--- पिता एकः चतुर्थश्रेणी कर्मचारी अस्ति। तस्य मासिकः आयः अतीवः ---(*iii*)--- अस्ति। येन परिवारस्य ---(*iv*)--- काठिन्येन भवति। मम परिवारे मातापितरौ, द्वौ भ्रातरौ ---(*v*)--- भगिनी च, इति पञ्च ---(*vi*)--- सन्ति। अतः अहं भवन्तं ---(*vii*)--- यत् मम ---(*viii*)--- क्षम्यताम् कृपया।

दिनाङ्कः :

20-03-2021

भवदीयः शिष्यः

सुरेश कुमारः

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत :

जनानां लोकानां वा तन्त्रं शासनं जनतन्त्रं वा कथ्यते। लोकतन्त्रे जनानां कल्याणम् एव शासनस्य प्रमुखं कार्यं मन्यते। अत्र प्रत्येकस्य जनस्य एव महत्वम्। भाषणे लेखने च अत्र पूर्णं स्वातन्त्र्यं भवति। व्यवहारे केचन् दोषाः अपि दृश्यन्ते। एतेषां दोषाणां दूरीकरणम् अनिवार्यम्। एतदर्थं सर्वेभ्यः शिक्षा अनिवार्या। शिक्षां विना लोकन्त्रं सुरक्षितं न भवति।

*प्रश्नाः*

[2×2=4]

(*i*) संस्कृतभाषया सारांशं लिखत।

(*ii*) उचितं शीर्षकं लिखत।

***अथवा***

निर्देशानुसारम् उत्तरत—

[1×4=4]

(*i*) जनानां शासनं किं कथ्यते ?

(*ii*) 'गुणानाम्' इति पदस्य किं विलोमपदम् अस्मिन् गद्यांशे प्रयुक्तम् ?

(*iii*) 'जनतन्त्रम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(*iv*) कां विना लोकतन्त्रं सुरक्षितं न भवति ?

**प्रश्न-16** स्वपाठ्यपुस्तकात् कौचित् द्वौ श्लोकौ लिखत, यौ प्रश्नपत्रेऽस्मिन् नागतौ स्याताम्। [2½×2=5]

***अथवा***

स्वपाठ्यपुस्तकात् 'वृक्षस्य महत्त्वम्' इति विषये एकं सुभाषित श्लोकं लिखत।

**प्रश्न-17** द्वादशवाक्येषु संस्कृतभाषया निबन्धलेखनं कुरुत (कोऽपि एकः)— [½×12=6]

(*i*) ग्राम्यजीवनम्

(*ii*) मम प्रदेशः

(*iii*) सदाचारः

(*iv*) महाकविः कालिदासः

प्रश्न-18 (अ) उचित विकल्पं चित्वा लिखत— [1×5=5]

(i) 'विजने प्रदेशे पदयात्रा न शुभावहा' इति चिन्तयति—

(क) न्यायाधीशः

(ख) गृही

(ग) निर्धनोजनः

(घ) आरक्षी

(ii) रागसमं नास्ति—

(क) दुग्धम्

(ख) दुःखम्

(ग) तक्रम्

(घ) फलम्

(iii) 'विद्वांसम्' इति पदे विभक्तिः अस्ति—

(क) पञ्चमी

(ख) षष्ठी

(ग) सप्तमी

(घ) द्वितीया

(iv) 'षडाननः' पदस्य सन्धिविच्छेदोऽस्ति—

(क) षडा + ननः

(ख) षड् + आननः

(ग) षट् + आननः

(घ) षष् + आननः

(v) 'कुर्यात्' इति रूपम् अस्ति—

(क) लट् लकारस्य

(ख) लोट् लकारस्य

(ग) विधिलिङ् लकारस्य

(घ) लृट् लकारस्य

( ब ) उचितं स्तम्भं सुमेलयत— [1×5=5]

| ( क ) | | ( ख ) |
|---|---|---|
| (*i*) नर्तिष्यन्ति | - | शब्दशास्त्रम् |
| (*ii*) अनन्तरं | - | प्रातःकाले भ्रमणं रोचते |
| (*iii*) प्रीत्या | - | तत्र शिवः |
| (*iv*) महद्यम् | - | भविष्यतकालः |
| (*v*) यत्र जीवः | - | तृतीया विभक्तिः |

( स ) उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत— [1×5=5]

(उपसर्गः, निकषा, तल्, चिरम्, तुष्टिः)

(*i*) सुखानां —— उत्तमा।

(*ii*) 'जनता' इत्यस्मिन् शब्दे प्रत्ययः —— अस्ति।

(*iii*) 'अभिनन्दामि' इति शब्द 'अभि' —— अस्ति।

(*iv*) ग्रामं —— क्रीड़ाक्षेत्रं वर्तते।

(*v*) ते तत्र —— अवसन्।